# Goraksha StotrarajaH

# गोरक्षस्तोत्रराजः

## Document Information

Text title : Goraksha Stotrarajah

File name : gorakShastotrarAjaH.itx

Category : deities_misc, stavarAja

Location : doc_deities_misc

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Description/comments : Goraksha Nikilavani Year 11-10, page 31/32 . From kalpadrumatantra

Latest update : December 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 14, 2022

*sanskritdocuments.org*

# गोरक्षस्तोत्रराजः

ॐ अस्य श्रीगोरक्षनाथस्तोत्रमन्त्रस्य विष्णु ऋषिः ।
अनुष्टुप् छन्दः । श्रीगोरक्ष निरञ्जनो देवता ।
विमला शक्तिः । धर्मार्थकाममोक्षार्थे जपे विनियोगः ।
आकाशमन्दिरं चैव ताराख्लैश्च मण्डितम् ।
तस्य मध्ये स्थितो नित्यं वराभयकराम्बुजः ॥ १॥

निरञ्जनो निराकारो निर्विकल्पो निरामयः ।
अगम्योऽगोचरोऽलक्ष्यो गोरक्षः सिद्धवन्दितः ॥ २॥

कौपीनी च परध्यानी तप्तकाञ्चनसन्निभः ।
ध्येयः शिवः परो देवो जटामुकुटमण्डितः ॥ ३॥

चिन्तामणिः पुमर्थानां चन्द्रार्काग्नित्रिलोचनः ।
सिद्धगन्धर्वयक्षेड्यो देवर्षिगणसेवितः ॥ ४॥

विमला वामभागे च निजा शक्तिः परात्मिका ।
एवं ध्यात्वा शिवं योगी बद्धसिद्धासनः सदा ॥ ५॥

इदं स्तोत्रं पठेन्नित्यं सर्वसिद्धिफलप्रदम् ।
श्रीगोरक्षस्तोत्रराजं दुर्लभं भुवनत्रये ॥ ६॥

देवासुरमनुष्याश्च न जानन्ति महीतले ।
सम्यग्ज्ञात्वा स्तुतो देवः सर्वकामप्रदायकः ॥ ७॥

श्रीगोरक्ष ! नमस्तुभ्यं नमस्तुभ्यं सदाशिव ! ।
सम्पूर्णाय नमस्तुभ्यं नमो लक्ष्मीप्रियाय ते ॥ ८॥

सर्वेषामेव जन्तूनां पापपुण्यविपाकदः ।
परं ब्रह्म परं धाम ! श्रीगोरक्ष ! नमोऽस्तुते ॥ ९॥

गकारो गुणसंयुक्तो रकारो रूपलक्षणः ।

क्षकारेणाक्षयं ब्रह्म श्रीगोरक्ष ! नमोऽस्तुते ॥ १०॥

ब्रह्मणां च परं ब्रह्म रुद्रादीनां शिरोमणिः ।
त्रैलोक्यं निर्मितं येन श्रीगोरक्ष ! नमोऽस्तुते ॥ ११॥

क्षमाधारी जितक्रोधः सन्तोषी विजितेन्द्रियः ।
धर्माधर्मपरित्यागी श्रीगोरक्ष ! नमोऽस्तुते ॥ १२॥

ब्रह्मचारी सदाशुद्धः कायकर्मी महातपाः ।
आशापाशो हृतो येन श्रीगोरक्ष ! नमोऽस्तुते ॥ १३॥

ज्ञानी धर्मेषु यो लीनः सत्यवादी दृढव्रतः ।
आत्मध्यानरतो नित्यं श्रीगोरक्ष ! नमोऽस्तुते ॥ १४॥

शुभाशुभविनिर्मुक्तो भावाभावविवर्जितः ।
निजभक्ते स्वयं दाता श्रीगोरक्ष ! नमोऽस्तुते ॥ १५॥

नरलोके नराधीशो नागलोके च नागराट् ।
देवलोके च देवेन्द्रः श्रीगोरक्ष ! नमोऽस्तुते ॥ १६॥

राजन्यानाञ्च यो राजा महाराजो महेश्वरः ।
महीपतिर्महीन्द्रश्च श्रीगोरक्ष ! नमोऽस्तुते ॥ १७॥

समस्तरसभोक्ता यो यः सदा भोगवर्जितः ।
सदा समरसो यश्च श्रीगोरक्ष ! नमोऽस्तुते ॥ १८॥

हठयोगविधाता च मत्स्यकीर्तिविवर्धनः ।
योगिभिर्मनसा गम्यः श्रीगोरक्ष ! नमोऽस्तुते ॥ १९॥

रेचकः पूरकश्चैव कुम्भक स्फोटक स्तथा ।
प्राणायामश्चतुर्धा ते श्रीगोरक्ष ! नमोऽस्तुते ॥ २०॥

ब्रह्मादिश्चैव बिष्णवादी रुद्रादिश्च सदाशिवः ।
ज्योतिर्मयोऽनवच्छिन्नः श्रीगोरक्ष ! नमोऽस्तुते ॥ २१॥

सिद्धानाञ्च महासिद्ध ऋषीणां च ऋषीश्वरः ।
योगिनाञ्चैव योगीन्द्रः श्रीगोरक्ष ! नमोऽस्तुते ॥ २२॥

पीठादीनां महापीठं शिवादीनां महाशिवः ।
मन्त्रादीनां महामन्त्रः श्रीगोरक्ष ! नमोऽस्तुते ॥ २३॥

विश्वतेजो विश्वरुपं विश्ववन्द्यः सदाशिवः ।
विश्वनामा विश्वनाथ: श्रीगोरक्ष ! नमोऽस्तुते ॥ २४॥

सर्वगुणो गुणाभावो निर्गुणश्च गुणस्थितः ।
साकारो वा निराकारः श्रीगोरक्ष ! नमोऽस्तुते ॥ २५॥

अनन्तलोकनाथश्च नाथनाथशिरोमणिः ।
सर्वनाथसमाराध्यः श्रीगोरक्ष ! नमोऽस्तुते ॥ २६॥

विश्वोत्पत्तिकरश्चैव विश्वेषां प्रतिपालकः ।
विश्वसंहारकर्ता च श्रीगोरक्ष ! नमोऽस्तुते ॥ २७॥

उत्पत्तिस्थितिसंहार कारिणे क्लेशहारिणे ।
सर्वाधारस्वरुपाय श्रीगोरक्ष ! नमोऽस्तुते ॥ २८॥

पिण्डब्रह्माण्डमध्ये च भुवनानि चतुर्दश ।
सर्वत्र व्यापको नाथः श्रीगोरक्ष ! नमोऽस्तुते ॥ २९॥

न जानामि कुलं गोत्रं वर्णावर्णविवर्जित ! ।
लक्ष्यालक्ष्यस्वरुपोऽसि श्रीगोरक्ष ! नमोऽस्तुते ॥ ३०॥

नोत्पत्तिर्न लयो नास्ते विकारो न च बन्धनम् ।
सदा समरसा बृत्तिः श्रीगोरक्ष ! नमोऽस्तुते ॥ ३१॥

न माता न पिता चैव न ते बन्धुः सहोदरः ।
अजः स्वयम्भूः सर्वात्मा श्रीगोरक्ष ! नमोऽस्तुते ॥ ३२॥

अदृश्यं दृश्यते नाथ ! अश्राव्यं श्रूयते सदा ।
त्वत्कृपालेशमात्रेण श्रीगोरक्ष ! नमोऽस्तुते ॥ ३३॥

सर्वत्र व्यापकः सूक्ष्मो जीवरुपी महेश्वरः ।
सर्वेन्द्रियमयो नाथ ! श्रीगोरक्ष ! नमोऽस्तुते ॥ ३४ ॥

चन्द्रादीनां तथा शैत्यं सूर्यादीनां त्वमुष्णता ।
सर्वसारस्वरुपोऽसि श्रीगोरक्ष ! नमोऽस्तुते ॥ ३५॥

उत्तमं मध्यमं नीचं त्वया सर्व विनिर्मितम् ।
यर्थवाग्निः सर्वरुपः श्रीगोरक्ष ! नमोऽस्तुते ॥ ३६॥

अण्डजस्वेदजोद्भिज्ज जेरजानां त्वमुद्भवः ।
अनन्तकोटिजीवानां श्रीगोरक्ष ! नमोऽस्तुते ॥ ३७॥

वायुस्त्व पञ्चरुपेण प्राणिनां देहधारकः ।
स्वयं सर्वमयो नाथः श्रीगोरक्ष ! नमोस्तुते ॥ ३८॥

शून्यानां च परं शून्यं परेषां परमेश्वरः ।
ध्यायताञ्च परंधाम श्रीगोरक्ष ! नमोऽस्तुते ॥ ३९॥

एकाकी वर्तते नित्यं भवपाशविवर्जितः ।
परं ब्रह्माक्षरं ज्योतिः श्रीगोरक्ष ! नमोऽस्तुते ॥ ४०॥

स्वर्गेषु पूज्यते दैवैर्मर्त्यलोकेषु मानवैः ।
पाताले नाथलोकैश्च श्रीगोरक्ष ! नमोऽस्तुते ॥ ४१॥

त्रिनेत्र स्त्रिपुराराति स्त्रिवेद स्त्रिजगत्पतिः ।
त्रयीवेद्य स्त्रिदेवात्मा श्रीगोरक्ष ! नमोऽस्तुते ॥ ४२॥

सिद्धाम्नायसमाम्नाता सिद्धाम्नायैकसिद्धिदः ।
सिद्धसङ्घैः सदा सेव्यः श्रीगोरक्ष ! नमोऽस्तुते ॥ ४३॥

तेजःपुञ्जः स्वयं देवो दीपो दीप्तिमतामपि ।
सर्वस्वान्तःस्थितं ज्योतिः श्रीगोरक्ष ! नमोऽस्तुते ॥ ४४॥

सर्वासां जीवजातीनां पापपुण्यैकसाक्षिणे ।
शुभाशुभफलाध्यक्ष ! श्रीगोरक्ष ! नमोऽस्तुते ॥ ४५॥

श्रीगोरक्ष स्तोत्रराजः स्वयं कृणेन निर्मितः ।
जपतां भक्तिभावेन सर्वसिद्धिविधायकः ॥ ४६॥

शिवस्तोत्रं विष्णुकृतं ब्रह्मणा पठितं पुनः ।
ये पठन्ति सदा भक्त्या ते लभन्ते समीहितम् ॥ ४७॥

इदं स्तोत्रं जपेन्नित्यं सर्वपापैः प्रमुच्यते ।
धनं पुत्रांस्तथा दाराँल्लभते नात्र संशयः ॥ ४८॥

मनसा कर्मणा वाचा स्तोत्रं यः पठते नरः ।
उद्धरेत्सप्तगोत्राणि कुलान्येकोत्तरं शतम् ॥ ४९॥

धनवाञ्जायते वंशे स्तोत्रं यस्य हृदि स्थितम् ।
जन्मजन्मकृतं पापं नाशमायाति सत्वरम् ॥ ५०॥

दर्शनं लभते साक्षाच्छ्रीनाथस्य जस्पतवम् ।

भूर्जपत्रे लिखेत्स्तोत्रमष्टगन्धेन भक्तितः ॥ ५१॥

धारयेतकण्ठमध्ये च यमलोके न पीड्यते ।
स्तोत्रराजं जपेत् प्रातः यत्स्वयं हरिणोदितम् ॥ ५२॥

गोरक्षमक्षयं देवं मनोवाचामगोचरम् ।
सिद्धनाथं सिद्धसेव्यं लभते नात्र संशयः ॥ ५३॥

इति श्रीकल्पद्रुमतन्त्रे श्रीकृष्णविरचितः
श्रीगोरक्षनाथस्तोत्रराजः सम्पूर्णः ।

Encoded and proofread by Chandrasekhar Karumuri

*Goraksha StotrarajaH*
pdf was typeset on December 14, 2022

Please send corrections to *sanskrit@cheerful.com*